अष्टमः पाठः वाचनप्रशंसा । (सरलार्थलेखनार्थम्)

डॉ. ए. पी. जे. अब्दुलकलाममहोदयः 'मिसाईल मॅन' इति बिरुदेन ख्यातः। तस्य जीवने तेन छात्राणां शैक्षणिकविकासार्थं नैके यत्नाः कृताः। १५ ऑक्टोबर इति तस्य जन्मदिनं 'वाचनप्रेरणादिवसरूपेण' आचर्यते । विविधानां ग्रन्थानां, लघुग्रन्थानां, वृत्तपत्राणां वाचनेन मनुष्ये के गुणाः विकसिताः भवन्ति, इत्यादयः विषयाः पद्येऽस्मिन् वर्णिताः सन्ति ।





शीलं सद्गुणसम्पत्तिः ज्ञानं विज्ञानमेव च ।
उत्साहो वर्धते येन वाचनं तद् हितावहम् ।।१।।

मनुजा वाचनेनैव बोधन्ते विषयान् बहून् ।
दक्षा भवन्ति कार्येषु वाचनेन बहुश्रुताः ।।२।।

वाल्मीकिव्यासबाणाद्याः प्राचीनाः कविपण्डिताः ।
तान् शिक्षयन्ति सततं ये सदा वाचने रताः ।।३।।

अद्ययावद्धि ज्ञानाय वृत्तपत्रं पठेत्सदा ।
सर्वविधसुविद्यार्थं वाचनमुपकारकम् ।।४।।

वृथाभ्रमणकुक्रीडापरपीडापभाषणैः ।
कालक्षेपो न कर्तव्यो विद्यार्थी वाचनं श्रयेत् ।।५।।

वाचनं ज्ञानदं बाल्ये तारुण्ये शीलरक्षकम् ।
वार्धक्ये दुःखहरणं हितं सद्ग्रन्थवाचनम् ।।६।।

१) सन्धिविग्रहाः – १) विज्ञानमेव = विज्ञानम् + एव। २) उत्साहो वर्धते = उत्साहः + वर्धते ।
अन्वयः – येन शीलं, सद्गुणसम्पत्तिः, ज्ञानं, विज्ञानम् उत्साहः च वर्धते तद् वाचनं हितावहम् एव ।

२) सन्धिविग्रहाः – १) वाचनेनैव = वाचनेन + एव । २) दक्षा भवन्ति = दक्षाः + भवन्ति ।
अन्वयः – मनुजाः वाचनेन एव बहून् विषयान् बोधन्ते । वाचनेन (मनुजाः) कार्येषु दक्षाः बहुश्रुताः (च)भवन्ति।

३) अन्वयः – ये सदा वाचने रताः तान् वाल्मीकि–व्यास–बाणाद्याः प्राचीनाः कविपण्डिताः शिक्षयन्ति।

४) सन्धिविग्रहाः – १) अद्ययावद्धि = अद्ययावत् + हि । २) पठेत्सदा = पठेत् + सदा ।
३) वाचनमुपकारकम् = वाचनम् + उपकारकम् ।
अन्वयः – मनुजः अद्ययावद् ज्ञानाय वृत्तपत्रं सदा हि पठेत् । सर्वविधसुविद्यार्थं वाचनम् उपकारकम् (वर्तते) ।

५) सन्धिविग्रहाः –१) कालक्षेपो न = कालक्षेपः + न । २) कर्तव्यो विद्यार्थी = कर्तव्यः + विद्यार्थी।
अन्वयः – (विद्यार्थिभिः) वृथाभ्रमण–कुक्रीडा–परपीडा–अपभाषणैः कालक्षेपः न कर्तव्यः । विद्यार्थी वाचनं श्रयेत् ।

६) अन्वयः – वाचनं बाल्ये ज्ञानदं, तारुण्ये शीलरक्षकम्, वार्धक्ये दुःखहरणं (भवति) (अतः) सद्ग्रन्थवाचनं हितं (भवति)।

१. पूर्णवाक्येन उत्तरं लिखत।

अ) वाचनेन के गुणाः वर्धन्ते ?

आ) वाचनेन मनुजाः किं बोधन्ते ?

इ) विद्यार्थिना कथं कालक्षेपः न कर्तव्यः ?

२. समानार्थकशब्दान् लिखत ।

शीलम्, दक्षः, रताः, कालक्षेपः, वार्धक्यम्, पण्डितः

३. जालरेखाचित्रं पूरयत ।

अ)



आ)



इ)



४. विरुद्धार्थकशब्दान् लिखत ।

सद्गुणः, उत्साहः, प्राचीनाः, उपकारकम्

५. सन्धिविग्रहं कुरुत ।

अ) वाचनेनैव आ) अद्ययावद्धि

६. माध्यमभाषया उत्तरं लिखत।

अ) वाचनम् उपकारकं कथम् इति स्पष्टीकुरुत।

आ) हितं सद्ग्रन्थवाचनम् इति कविः किमर्थं वदति?

७. विशेषण-विशेष्याणां मेलनं कुरुत ।

विशेषणम्	**विशेष्यम्**
उपकारकम्	मनुजाः
प्राचीनाः	विषयान्
दक्षाः	वाचनम्
बहून्	कविपण्डिताः



पठत-बोधत

पठनस्य दोषाः

गीती शीघ्री शिरःकम्पी यथालिखितपाठकः ।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ॥

उच्चारणविषयकश्लोकः ।

व्याघ्री यथा हरेत् पुत्रान् दंष्ट्राभ्यां न च पीडयेत् ।
भीता पतनभेदाभ्यां तद्वद् वर्णान् प्रयोजयेत् ॥

73LH3H